"उत्कृष्टायाभिरूपाय वराय सदृशाय च । अप्राप्तामपि तां कन्यां तस्मै दद्याद्यथाविधि" मनुः "अप्राप्ताम् अप्राप्त विवाहप्रशस्तकालाम्" उ०त० रघुनन्दनः ।

**अप्राप्ति** स्त्री अभावे न०त० । १ लाभाभावे "तदप्राप्तिमहादुःखविलीनाशेषपातका" का०प्र० २ प्रमाणान्तरतोज्ञानाभावे "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सतीति" मीमां० ३ असम्भवे "प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरिति" शा०सू० । "अप्राप्तिरसम्भव" इति भा० । ४ अनुपपत्तौ च "समुदायहेतुकेऽपि तदप्राप्तिः" शा०सू० । समुदायाप्राप्तिः समुदयभावानुपपत्तिः भा० । न०ब० । ५ लाभशून्ये त्रि० ।

**अप्रामाणिक** त्रि० प्रमाणेन सिद्धः, प्रमाणं वेद वा ठञ् न०त० । १ प्रमाणासिद्धे २ प्रमाणानभिज्ञे च स्त्रियां ङीप् । "अप्रमाणिकीयमनवस्थेति" सां०भा० ।

**अप्रामाण्य** न० अभावे न०त० । १ यथार्थबोधकत्वाभावे "अप्रामाण्यं कथयति सदा नन्दसूनोर्वियोगः" पदा० अप्रामाण्यहेतुकानुष्ठानाभावे च "अननुष्ठानलक्षणमप्रामाण्यम्" सां०सू० ।

**अप्रामि** त्रि० प्रकर्षेण अम्यते हिंस्यतेऽसौ प्र+अम–णिच् कर्म्मणि इन् न०त० । अहिंसिते, "अप्रामिसत्यो मघवन्" । ऋ० ८,६०,४, "अप्रामिसत्यः अहिंसितसत्यः" भा० ।

**अप्रायु** त्रि० प्र+इण–उण् न०त० । अगन्तरि, "असन्नप्रायुवोरक्षितारो दिवेदिवे" ऋ० १,८९,१, "अप्रायुवः अप्रायवः अगच्छन्तः वेदे तन्वादित्वादुवङ्" भा० ।

**अप्रायुस्** त्रि० न प्रकृष्टं प्रगतं वाऽऽयुर्यस्य । १ प्रकृष्टायुर्भिन्ने २ गतायुर्भिन्ने च । "नक्षयः सुदर्शतरो दिवातरादप्रायुषः" ऋ० १,१२७,५ ।

**अप्रिय** न० विरोधे न०त० । प्रियभिन्ने इष्टभिन्ने स्वभातोद्विष्टे दुःखे "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति" श्रुतिः "तस्माद्यम इव स्वामी स्वयं हित्वा प्रियाप्रिये" इति मनुः । २ तत्साधने वचनादौ त्रि० "सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्" "पाणिग्राहस्य साध्वी स्त्री नाचरेत् किञ्चिदप्रियम्" इति च मनुः । (सिङि) शृङ्गीमत्स्ये स्त्री शब्द र० । प्रिय हेतुत्वाभावात्तस्यास्तथात्वम् । [जकवाक्यप्रयोक्तरि

**अप्रियंवद** त्रि० विरोधे न०त० । कटुवाक्यवादिनि उद्वे-

**अप्रियवादिन्** त्रि० अप्रियं वदति वद–णिनि ६त० स्त्रियां ङीप् । । कटुवाक्यवादिनि उद्वेजकवाक्यकथके "माता यस्य गृहे नास्ति भार्या चाप्रियवादिनीति" चाणक्यः ।

**अप्रीति** स्त्री अभावे न०त० । १ सन्तोषाभावे, २ दुःखे, "प्रीत्यप्रीतिविषादाः प्रकाशप्रवृत्तिनियमार्थाः" इति सां०का० । "प्रीतिः सुखं प्रीत्यात्मकः सत्त्वगुणः, अप्रीतिर्दुःखमप्रीत्यात्मको रजोगुणः" इति सां०त०कौ० ।

**अप्रेतराक्षसी** स्त्री न प्रेता प्राप्ता राक्षसीम् अत्या०स० न०त० । तुलस्याम्, अपेतराक्षसीशब्दे २५४ पृष्ठे विस्तरः ।

**अप्रेमन्** पु० न प्रेम विरोधे न०त० । स्नेहविरोधिनि द्वेषे ।

**अप्रौढ़** त्रि० न प्रौढः न०त० । १ अप्रवृद्धे २ अपटौ च ।

**अप्व** त्रि० आप–बा०व पृ० ह्रस्वः । प्राप्ये "अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि" ऋ० १०, १०३, १२, "हरिमाणं तेऽङ्गेभ्योऽप्वामन्तरोदरात्" अथ०९,८,९

**अप्स** त्रि० अपः सनोति सन–ड । १ अपां विशेषगुणीभूते रसे "पृथिव्याः पुरीषमप्सोनाम" य०१४,४ । "अप्सोनामापां सारभूतो रस" इति वेददी० । आप इव निर्मलतया सन्यते संबध्यते सन–बा०ड । २ रूपे निरु० ।

**अप्सरःपति** पु० ६त० । १ इन्द्रे अप्सरापतिरप्यत्र ।

**अप्सरस्** स्त्री ब०व० अद्भ्यः सरन्ति उद्गच्छन्ति सृ–असुन् । समुद्रान्निस्सृतायां स्वर्वेश्यायाम् "अप्सु निर्मथनादेव रसात्तस्माद्वरस्त्रियः । उत्पेतुर्मनुजश्रेष्ठ । तस्मादप्सरसोऽभवन्" इत्युक्तेस्तासां तथात्वम् । "एकाप्सरःप्रार्थितयोर्विवादः" रघुः "आराधितोऽद्धा मनुरप्सरोभिश्चक्रे प्रजाः स्वाः सनिमेषचिह्नाः" इति माघः । तासां च नाट्यकर्म्म वृत्तिः । तास्च प्रधानतया द्वादश वह्निपुराणे दर्शिताः "उर्व्वशी मेनका रम्भा मिश्रकेशी ह्यलम्बुषा विश्वाची च घृताची च पञ्चचूडा तिलोत्तमा भानुवत्यबला रम्या द्वादशाप्सरसः शुभाः" इति गणभेदनामाध्याये । अत्र शुभा इति विशेषणात् अन्या अपि । तास्च "उर्वशी मेनका रम्भा घृताची पुञ्जिकास्थला सुकेशी मञ्जुघोषा च महारङ्गवतीति च" इति मा० पु० "अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा । क्रोधा प्रधा च विश्वा च विनता कपिला मुनिः । कद्रुश्च मनुजव्याघ्र । दक्षकन्यास्त्रयोदश" इति कश्यपपत्नीरभिधाय । "इत्येते देवगन्धर्व्वाः प्राधेयाः परिकीर्त्तिताः" इति गन्धर्व्ववंशमभिधाय च "इमं त्वप्सरसां वंशं विदितं पुण्यलक्षणम् प्रधाऽसूत महाभागादेव देवर्षितः पुरा । अलम्बुषा मिश्रकेशी विद्युत्पर्णा तिलोत्तमा । अरुणा रक्षिता चैव रम्भा तद्वन्मनोरमा । केशिनी च सुबाहुश्च सुरता सुरसा तथा । सुप्रिया चातिबाहुश्च"